"निजनिर्म्मितकारिकावलीमतिसंक्षिप्तचिर-न्तनोक्तिभिः ।
विशदीकरवाणि कौतुकात् ननु राजीवदया-वशंवदः ॥"

निर्म्मितिः, स्त्री, ( निर् + मा + क्तिन् । ) निर्म्माणम् । गठनम् । रचनम् । यथा,—
"नियतिकृतनियमरहितां ह्लादैकमयीमनन्य-परतन्त्राम् ।
नवरसरुचिरां निर्म्मितिमादधती भारती कवे-र्जयति ॥"
इति काव्यप्रकाशः ॥

निर्म्मुक्तः, पुं, ( निर् + मुच् + क्तः । ) मुक्तकञ्चुकः । अचिरात् त्यक्तत्वक् सर्पः । इत्यमरः ।१।८।६॥ त्यक्तसंयोगे, त्रि । इति मेदिनी । ते, ११७ ॥ ( यथा, देवीभागवते । ३ । ८ । २० ।
"रागद्वेषाञ्च निर्म्मुक्तः कामक्रोधसमावृतः ।
पुनरेव गृहं प्राप्तो यथा पूर्व्वं तथा स्थितः ॥")

निर्म्मुटं, स्त्री, ( निर्म्मुटति आक्षिपतीति । निर् + मुट आक्षेपे + कः । ) करशून्यहट्टः । तत्-पर्य्यायः । पण्याजिरम् २ कपञ्जनम् ३ । इति शब्दरत्नावलीत्रिकाण्डशेषौ ॥

निर्म्मुटः, पुं, ( निर् + मुट + "इगुपधेति ।" ३ । १ । १३५ । इति कः । ) वनस्पतिः । अपुष्प-वृक्षः । इति त्रिकाण्डशेषः ॥ सूर्य्यः । खर्परः । इति हारावली । २५५ ॥

निर्म्मोकः, पुं, ( नितरां मुच्यते इति । निर् + मुच् + घञ् । ) सर्पत्वक् । तत्पर्य्यायः । अहि-कोषः २ निर्ल्वयनी ३ कञ्चुकः ४ । इति हेम-चन्द्रः । ४ । ३८१ ॥ ( यथा, आर्य्यासप्त-शत्याम् । ३२८ ।
"निजगात्रनिर्व्विशेषस्थापितमपि सारमखिल-माहाय ।
निर्म्मोकञ्च भुजङ्गी मुञ्चति पुरुषञ्च वारवधूः ॥"
त्वङ्मात्रम् । यथा, महाभारते । १३ । १४१ । १०१ ।
"मृगनिर्म्मोकवसनाश्चीरवल्कलवाससः ।
निर्द्वन्द्वाः सत्पथं प्राप्ता वालखिल्यास्तपोधनाः ॥"
भावे घञ् ।) मोचनम् । आकाशः । सन्नाहः । इति मेदिनी । के, १११ ॥ ( सावर्णिमनोः पुत्रविशेषः । यथा, भागवते । ८ । १३ । ११ ।
"अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः ।
निर्म्मोकविरजस्काद्याः सावर्णितनया नृप ॥")

निर्म्मोक्षः, पुं, ( नितरां मोक्षः । ) त्यागः । इति नानार्थसर्गशब्दार्णवे अमरः ॥ ( यथा, रघुः । १० । २ ।
"न चोपलेभे पूर्व्वेषामृणनिर्म्मोक्षसाधनम् ।
सुताभिधानं स ज्योतिः सद्यः शोकतमोऽप-हम् ॥" )

निर्यन्त्रणं, त्रि, (निर् + यन्त्र + ल्युट् । ) अबाधम् । निरर्गलम् । उच्छृङ्खलम् । इति जटाधरः ॥ ( यन्त्रणाशून्यम् । यथा, सुश्रुते । १ । ४४ ।
"ततः खादेद्गुडातोयसेवी निर्यन्त्रणात्विमे ॥")

निर्याणं, स्त्री, ( निर्यांति निर्गच्छति मदोऽनेनेति । निर् + या + करणे ल्युट् । ) गजापाङ्गदेशः । ( यथा, माघे । ५ । ४१ ।
"प्रत्यग्रदन्तिनिशिताङ्कुशदूरभिन्न-
निर्याणनिर्यदसृजं चलितं निषादी ॥" )
मोक्षः । अध्वनिर्गमः । इति मेदिनी । णे,५७॥ ( यथा, महाभारते । १३ । ५५ । ६ ।
"निर्याणञ्च रथेनाशु सहसा यत् कृतं त्वया ॥"
पशुपादबन्धनरज्जुः । इति वैजयन्ती ॥ यथा, माघे । १२ । ४१ ।
"निर्याणहस्तस्य पुरो दुधुक्षतः ॥" )

निर्यातनं, स्त्री, ( निर् + यत + णिच् + ल्युट् । ) वैरशुद्धिः । शत्रुप्रतीकारः । ( यथा, हरि-वंशे । १७७ । ४७ ।
"तथानिरुद्धहरणं कृतं मघवता स्वयम् ।
न ह्यन्यस्य भवेच्छक्तिर्व्वैरनिर्यातनं प्रति ॥" )
दानम् । त्यागः । न्यासार्पणम् । न्यस्तद्रव्यस्य समर्पणम् । इत्यमरः । ३ । ३ । ११६॥ ऋणादि-शुद्धिः । इति भरतः ॥ मारणम् । इति हेम-चन्द्रः । ३ । ४६८ ॥

निर्यामः, पुं, ( निर्यम्यतेऽनेनेति । निर् + यम + घञ् । ) पोतवाहः । इति हेमचन्द्रः ।३।५४०॥

निर्यासः, पुं, ( निर् + यस + घञ् । ) कषायः । क्वाथः । इति शब्दमाला ॥ वृक्षादिक्षीरम् । आटा इति भाषा ॥ तत्पर्य्यायः । वेष्टकः २ । इति रत्नमाला ॥ ( यथा, मनुः । ५ । ६ ।
"लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ।
शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥"
अर्द्धर्चादित्वात् क्लीवेऽपि दृश्यते ॥ * ॥ क्वचित् स्वरसोऽपि वाच्यः । यथा, वैद्यकचिकि-त्सासंग्रहे दलीकन्दघृते ।
"कदलीकन्दनिर्यासे तत्प्रसूनतुलां पचेत् ।
चतुर्भागावशेषेऽस्मिन् घृतप्रस्थं विपाचयेत् ॥")

निर्युक्तिकं, त्रि, ( निर्गता युक्तिर्यस्मात् । कप् । ) युक्तिरहितम् । यथा । "नहि क्रियारहितं वाक्य-मस्तीति प्राचां प्रवादो निर्युक्तिकत्वादश्रद्धेयः ।" इति शब्दशक्तिप्रकाशिका ॥

निर्यूथः, पुं, ( नितरां यूथः । ) निर्यासः । इति शब्दमाला ॥

निर्यूहः, पुं, शेखरम् । आपीड़म् । द्वारम् । निर्यासः । क्वाथरसः । (यथास्य पर्य्यायो वैद्यक-रत्नमालायाम् ॥ "क्वाथः कषायो निर्य्यूहः ॥" ) नागदन्तः । अवलम्बनार्थं गेहादिभित्तिनिर्गतं काष्ठद्वयम् । इत्यमरमेदिनीकरौ ॥

निर्लक्षणः, त्रि, (निर्गतं लक्षणं यस्मात् ।) लक्षण-हीनः । तत्पर्य्यायः । पाण्डुरपृष्ठः २ । इति हेमचन्द्रः । ३ । १०१ ॥ ( यथा, गोः रामा-यणे । २ । ११८ । ५ ।
"निर्लक्षणो लक्षणवान् दुःशीलः शील-वानपि ॥" )

निर्लिप्तः, पुं, ( निर् + लिप + क्तः । ) श्रीकृष्णः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्याये ।
"निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः ॥"
लेपरहिते, त्रि ॥ ( यथा, ब्रह्मवैवर्त्ते ।२।१।४६।
"निर्गुणा च निराकारा निर्लिप्तात्मस्वरू-पिणी ॥" )

निर्लेपः, त्रि, ( निर्गतो लेपो यस्मात् । ) लेप-शून्यः । आसङ्गरहितः । यथा,—
"निर्लेपः कुचमण्डलो मृगदृशां हारावली निर्गुणा
नेत्राम्भोरुहमञ्जनेन रहितं नीरागमोष्ठाधरम् ॥"
इत्यानन्दचम्पूग्रन्थे विंशतिस्तवकः ॥
पापशून्यः । यथा, "लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः ।" इति कुसुमा-ञ्जलिः ॥

निर्ल्वयनी, स्त्री, ( नितरां लीयते संलीनो भवति अहिरस्यामिति । निर् + ली + ल्युट् । पृषो-दरादित्वात् वागमः । ) कञ्चुकः । सर्पत्वक् । इति हेमचन्द्रः । ४ । ३८१ ॥

निर्वचनं, स्त्री, ( निर् + वच + भावे ल्युट् । ) निरुक्तिः । निश्चयकथनम् । यथा, श्रीभागवते । ६ । २० । ३७ ।
"नामनिर्व्वचनं तस्य श्लोकमेकं सुरा जगुः ॥"
( प्रशंसा । यथा, महाभारते । १ ।१०६।२३।
"प्रनष्टं शान्तनोर्वंशं समीक्ष्य पुनरुद्धृतम् ।
ततो निर्व्वचनं लोके सर्व्वराष्ट्रेष्ववर्त्तत ॥"
निर्गतं वचनं यत्र । तूष्णीम् । यथा, कुमारे । ७ । १६ ।
"पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्व्वम् ।
सा रञ्जयित्वा चरणौ कृताशी-
र्माल्येन तां निर्वचनं जघान ॥"
वाक्यातीते, त्रि । यथा, महाभारते ।३।१६६।३६।
"येषां तड़ागानि महोदकानि
वाप्यश्च कूप्याश्च प्रतिश्रयाश्च ।
अन्नस्य दानं मधुरा च वाणी
यमस्य ते निर्व्वचना भवन्ति ॥")

निर्व्वपणं, स्त्री, ( निर् + वप + भावे ल्युट् । ) दानम् । इत्यमरः । २ । ७ । ३० ॥ ( यथा, मनुः । ३ । २४८ ।
"अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः ॥"
पिण्डदानम् । यथा, तत्रैव । ३ । २६० ।
"एवं निर्व्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम् ।
गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् ॥"
यथा च गोः रामायणे । ६ । १०८ । ४२ ।
"एषा मन्दाकिनी पुण्या नदी सुविमलोदका ।
पितुर्निर्व्वपणं यत्र मया मूलफलैः कृतम् ॥"
पिण्डः । यथा, महाभारते । १३ । ८४ । १४ ।
"तत् समाप्य यथोद्दिष्टं पूर्व्वकर्म्म समाहितः ।
दातुं निर्व्वपणं सम्यक् यथावदहमारभम् ॥"
अन्नादिसंविभागः । इति श्रीधरस्वामी ॥ यथा, भागवते । ५ । १२ । १२ ।
"रहूगणैतत् तपसा न याति
न चेज्यया निर्व्वपणाद् गृहाद् वा ।")